श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीवेङ्कटाध्वरिगुरुभिरनुगृहीताः

# ॥ श्रीरामानुजवर्णनाश्लोकाः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीरामानुजवर्णनाश्लोकाः ॥

एषा भूतपुरी निरीक्षितचरी दोषापहन्त्री मया
श्रीमानत्र गुणाब्धिराविरभवद्रामानुजार्यो मुनिः।
त्रय्यन्तामृतसिन्धुमन्थनभवद्धय्यङ्गवीनात्मकं
विज्ञानं यदुपज्ञमेव विदुषामद्यापि विद्योतते ॥ 1 ॥

कामादिवैरिगणभीमानवद्यनिजनामाभिलाषगरिमा
वैमानिकार्यसमभूमा मतौ वचनसीमातिलङ्घिमहिमा।
श्रीमाननूनकलसोमाननो विमलधामावमानितरविः
क्षेमाणि जृम्भयतु भूमावमुत्र स च रामानुजो यतिपतिः ॥ 2 ॥

स जयति रामानुजयतिः
अजयति परवादिनं यदीयोक्तिः।
सञ्जयति बोधमनघं
रञ्जयति बुधान् व्यथां च भञ्जयति ॥ 3 ॥

ते मीमांसाशास्त्र -
प्रमथनपरिकलितबुधजनानन्दाः।
लक्ष्मणमुनेः प्रबन्धाः
लक्ष्मणपूर्वजशरा इव जयन्ति ॥ 4 ॥

रामानुजाय गुरवे नरवेषभाजे
शेषाय धूतकलये कलये प्रणामान्।
यो मादृशानपि कृशान् परिपातुकामः
भूमाववातरदुदञ्चितबोधभूमा ॥ 5 ॥

रामानुजौ यामुनतीर्थसेवा -
    परावुदीतौ नरकं निरोद्धुम्।
तयोः पुराणः प्रणिनाय गीतां
    तस्या नवीनस्तु ततान टीकाम्॥ 6॥

यामुनतीर्थाश्रमिणौ
    रामानुजमुनिर्मुकुन्दश्च।
आद्यं त्रिवेणुधरमधिकं
    अन्यदन्ताद्यमेकवेणुधरम्॥ 7॥

नित्यं हेयगुणावधूननपरा नैर्गुण्यवादाः श्रुतौ
    मुख्यार्थाः सगुणोक्तयः शुभगुणप्रख्यापनाद्ब्रह्मणः।
अद्वैतश्रुतयो विशिष्टविषया निष्कृष्टरूपाश्रया
    भेदोक्तिस्तदिहाखिलश्रुतिहितं रामानुजीयं मतम्॥ 8॥

जयतु जगति लक्ष्मणार्यपक्षः
    जयतु वचः श्रुतिमौलिदेशिकानाम्।
जयतु निगमवर्त्म निस्सपत्नं
    जयतु चिराय च मूर्तिरञ्जनाद्रौ॥ 9॥

॥ इति श्रीरामानुजवर्णनाश्लोकाः समाप्ताः॥

prapatti dot com
sunder kidāmbi
sunder kidāmbi